# केन्द्रीय विद्यालय संगठन , पटना संभाग

SET-A

## प्री - बोर्ड - 2 परीक्षा 2025-26

## कक्षा - X

## संस्कृतम्

अवधिः 3 होरा: पूर्णाङ्काः 80

छात्रस्य/ छात्राया: नाम - ..........................................................................

अनुक्रमांकः- ..........................................................................

अनुभाग: ..........................................................................................

दिनाङ्कः- ..................................................................

80

निरीक्षकस्य हस्ताक्षरम् परीक्षकस्य हस्ताक्षरम्

---

निर्देशा: - 1. उत्तराणि अस्यामेव उत्तरपुस्तिकायां निर्दिष्टस्थाने लेखितव्यनि । (प्रश्नों के उत्तर इसी उत्तर पुस्तिका में लिखने हैं ।)

2. समस्ताः प्रश्नाः अनिवार्या: सन्ति ।(सभी प्रश्न अनिवार्य हैं। )

3. सर्वेषाम् प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि |

4. प्रश्नानाम् निर्देशा: ध्यानेन अवश्यं पठनीया : |

---

# खण्ड (क) अपठित-अवबोधनम् - 10

## प्रश्न 1- अधोलिखित-अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

अनुशासनाम् हि नाम कर्तव्यम् सर्वेषाम् कृते अनुशासनम् आवश्यकम् | प्रकृतिरपि अनुशासनम् पालयति , यथा अनुशासनकारणादेव सूर्य: स्वपरिपथे भ्रमति , वायु: अहर्निशम् प्रवहति , समये मेघ: वर्षति, समयानुसारेण ऋतव: आयान्ति यान्ति च | तथैव मानव जीवने कर्तव्य – अकर्तव्यबोध: अनुशासनात् एव भवति | परञ्च अद्यत्वे सर्वत्रैव विशेषत: छात्रेषु अनुशासनाभाव: दृश्यते , ते विद्यालयस्य अनुशासनम् न परिपालयन्ति , सर्वदा नियमोल्लंघ्य राष्ट्रियसम्पद: हानिम् कुर्वन्ति | गुरुन् मातापितृन् तिरस्कुर्वन्ति | अत: विद्यालये छात्रेभ्य अनुशासनशिक्षा दातव्या , येन ते स्वजीवने सफलं कृत्वा देशस्यापि शिर: उन्नतम् कुर्यु : , तेभ्य: इयमपि शिक्षा दातव्या यत् यदि प्रकृति: स्वकर्तव्याचरणात् भ्रष्टा भविष्यति , तर्हि जगत: स्थिति: कीदृशी भविष्यति , इति विचारणीयम् | एवमेव अनुशासनाभावात् छात्रा: स्वजीवनेन सह राष्ट्रस्यापि विनाशं करिष्यन्ति |

I. एक पदेन उत्तरत - ( केवलं प्रश्नद्वयं ) 1 x 2 = 2

क) के विद्यालयस्य अनुशासनम् न परिपालयन्ति ?
ख) अनुशासनहीना: छात्रा: राष्ट्रस्य किम् करिष्यन्ति ?
ग) किम् नाम अनुशासनम् ?

II. **पूर्णवाक्येन उत्तरत -** ( केवलं प्रश्नद्वयं ) 2 x 2 = 4

क) प्रकृति: अनुशासनम् पालयन् किम्- किम् करोति ?

ख) विद्यालये छात्रेभ्य: अनुशासनस्य शिक्षा किमर्थं दातव्या ?

ग) अद्यत्वे अनुशासनाभावात् किम् भवति ?

III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत | 1 x 1 =1

IV. निर्देशानुसारं उत्तरत - ( केवलं प्रश्नत्रयं ) **1 x 3 = 3**

क) “ **आयान्ति** “ इति क्रियापदस्य किम् कर्तृपदम् ?

i) अहर्निशम् ii) सूर्य: iii) ऋतव:

ख) “ **सम्मानयन्ति** “ इति पदस्य किम् विलोमपदम् अत्र प्रयुक्तम् ?

i) तिरस्कुर्वान्ति ii)परिपालयन्ति iii) आयान्ति

ग) “ ते स्वजीवने सफलं कृत्वा देशस्य शिर: उन्नतम् कुर्यु : “ अस्मिन वाक्ये विशेषण पदम् किम् अस्ति ?

i) देशस्य ii) स्वजीवनम् iii) उन्नतम् / सफलं

घ) " वायु: अहर्निशम् प्रवहति " अत्र क्रियापदम् किम् ?

i) वायु : ii) अहर्निशम् iii) प्रवहति

खण्ड (ख) – रचनात्मकलेखनम् - 15

2. प्रदत्त - मञ्जूषायाः सहायतया अवकाश - प्राप्तिहेतो: प्राचार्यं प्रति लिखितं पत्रं पूरयित्वा लिखत |
**½x 10 = 5**

कारणात्, अनुग्रहम् , सेवयाम्, ज्वरपीडित:, महोदय , प्राचार्य: असमर्थ: , विश्रामम् , निवेदनम्, अवकाशं

i) ----------------------
ii)------------ महोदय: ,
क . ख . ग .विद्यालय ,
अ . ब . स . प्रदेश
iii) -------------

सविनयं iv) -------------------- अस्ति यत् गतरात्र्या: अहम् v) --------------अस्मि | अस्मात् vi) ------------ अहम् विद्यालयं आगन्तुम् vii) --------------- अस्मि | चिकित्सक: मह्यं viii) ------------- कर्तुं परामर्शम् ददाति | अतएव दिनद्वयस्य ix) ----------प्रदाय x)--------------- करोतु अत्रभवान् |

भवदीय: आज्ञाकारी शिष्य:
क. ख. ग

3. अध: प्रदत्तचित्रं दृष्ट्वा मञ्जूषायाम् प्रदत्त शब्दानाम् सहायतया पञ्च वाक्यानि संस्कृतेन लिखत |
1 x 5 = 5

मञ्जूषा

बालक: , पश्यति , हरितम् , वृक्षा: , उन्नता: , धावन्ति , पादप्रहारं करोति , प्रसन्ना: , सुन्दरम् , उद्यानम् , कन्दुकेन , पादकन्दुक-क्रीडा , तीव्रगत्या



4. अधोलिखितायाम्  कथायाम् मञ्जूषात: समुचितं पदम् आदाय रिक्त- स्थानपूर्ति: पूरयत -½x 10 = 5

मञ्जूषा

सहमतिम् , हितकार्याणि , अभवताम् , मन्त्रिण: , वानरस्य , प्रतिदिनमेव , विलक्षणम् , स्वभावेन , रिपू , शशकश्च

एकस्मिन् वने एक: सिंह: राज्यं करोति स्म | सिंह: i) ------------------- अतीव मृदुल: हास्यप्रिय: , द्यालुश्च आसीत्  | स: सर्वदा प्रजानाम् ii) ------------------- कर्तुं रुचिनाम् भवति | प्रजाजनानाम् सर्वप्रकारेण कल्याणम् भवेदिति धिया सिंहेन स्वराज्ये त्रय: iii) ------------------ नियुक्ता: | ते त्रय: मन्त्रिण: आसन् - मृग: वानर: iv) ---------------------------------| एते त्रय: विविधबलै: विभूषिता आसन् | मृगस्य तु मनोबलं अतुल्यम् आसीत् , v) -------------------------च शारीरिकम् बलं अनुपमम् आसीत् | एवमेव शशकस्य vi) ------------------------ बुद्धिबलम् सर्वान् अतिशेते | एवं प्रकारेण एते त्रय: विविधबलमंडिता: मन्त्रिण: राजकर्मणि सहयोगम् प्रददाति | राजा अपि एतेषां त्रयाणाम् vii) ------------------------------- विना न किमपि कार्यं कुरुते | एते मन्त्रिण: प्रजनानाम् हितसाधनाय viii) ------------------------------ समुचितं प्रयत्नं कुर्वन्ति | अत: एव सर्वे प्रजानना: एतान् मन्त्रिपरिषद्सदस्यान् आद्रियन्ते | किन्तु तस्मिन् एव वने शृगाल: लोमशिका च मन्त्रिणाम् रिपुतुल्यौ ईष्यालू निवसत: | एतौ द्वावेव ix ) ----------------------------राजपदम् प्राप्तुमिच्छत: | किन्तु मन्त्रिणाम् राज भक्ति कारणात् कदापि साफल्यम् प्राप्तुं समर्थौ न  x) ------------------------------------------------

## खण्डः (ग)- अनुप्रयुक्त-व्याकरणम् – 25

5 . अध: रेखांकितपदेषु संधिम् विच्छेदम् वा कुरुत -   1 x 4 = 4

क) **अति + अधिकम्** परिश्रमं मा कुरु |

ख) सभायाम्  **जगदीश:** पूज्य : अस्ति |

ग) **प्रत्येकम्** मनुष्य: सुयोग्य: अस्ति |

घ) **यदि + अपि** स: बाल: तथापि स: सुन्दरम् गायति |

6. अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रकृति प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं प्रदत्त विकल्पेभ्य : चित्वा लिखत |   1 x 4 = 4

क) पिता किं तपस्तेपे इत्युक्ति: तत् **कृतज्ञता** |

i) कृतज्ञ + टाप्   ii) कृतज्ञ + तल्   iii) कृतज्ञ + त्व

ख) **<u>श्रद्धा +मतुप्</u>** ज्ञानं लभते |

i) श्रद्धामत ii) श्रद्धामन iii) श्रद्धावान्

ग) '**<u>विद्वस + त्व</u>** ' सर्वत्र पूज्यते |

i) विद्वत्वम् ii) विद्वता iii) विदुषिता

घ) **<u>अजा</u>** क्षेत्रम् गच्छति |

i) अ + जा ii) अज + टाप् iii) अज + आ

7. मञ्जूषायाम् प्रदत्तै उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - 1 x 4 =4

च , शनै: , उच्चै:, श्व :

क) शशक: वेगेन धावति , कूर्म: तु ---------------------- चलति |

ख) वने सिंह: ----------------------------- गर्जति |

ग) --------------------- मंगलवासर: भविष्यति |

घ) रमा लता ------------- खेलत: |

8. रेखांकित पदानाम् समस्तपदम् विग्रहं वा लिखत --- 1 x 4 = 4

क) **<u>गुरो: वचनं</u>** उपदेयम् |

ख) **<u>न अवद्यम</u>** जीवितं भवति |

ग) **<u>साधुजनमैत्री</u>** सुखदा भवति |

घ) एतद् **<u>राज्ञ: भवनं</u>** परित्यज्य वनं गच्छाम: |

9. अधोलिखितवाक्येषु अङ्कानाम् स्थाने संस्कृतपदैः समयं लिखत |( केवलं प्रश्नत्रयं ) 1 x 3 = 3

यथा - 7:15 (सपाद सप्तवादने) काव्य गोष्ठ्या: समापनं भवति |

i) सा **9:15** ------------------------ वादने अस्मान् कथाम् श्रावयति |

ii) **11: 45** ------------------------------------- वादने कक्षायाम् आगच्छति |

iii) **8: 15** -------------------------- वादने वयं भोजनं कुर्म: |

iv ) प्रातः **10:30** --------------------------- वादने श्लोक प्रतियोगिताया: उद्घाटनम् |

10. अधोलिखित वाक्येषु रेखांकितपदम् अशुद्धं अस्ति | प्रदत्त विकल्पेभ्य: उचितं उत्तरं चित्वा लिखत | 1 x 3 = 3

क) अहम् **<u>नेत्रयो:</u>** पश्यामि |

i) नेत्रेभ्य: ii) नेत्राभ्याम् iii) नेत्रेषु

ख) स: **<u>बालिका</u>** क्रीडति |

i) बालक: ii) बालकौ iii) बाला

ग) अहम् गीताम् **<u>पठिष्यामः</u>** |

i) पठिष्यामि ii) पठिष्यति iii) पठिष्याव:

11. वाच्यानुसारम् उचितपदै: रिक्त स्थानानि पूरयित्वा अधोलिखितम् संवादम् लिखत - 1 x 3 =3

(केवलं प्रश्नत्रयं)

पिता , उत्तिष्ठामि , त्वया , देवा:

i) आचार्य : - -------------------- गृहे प्रतिदिनं कदा उत्थीयते ?

ii) छात्र: - अहम् प्रतिदिनं सप्तवादने ------------------- |

iii) आचार्य: - केन गृहे ------------------ पूज्यन्ते ?

iv) छात्र: - मम ----------------- गृहे देवान् पूजयति |

खण्ड (घ) - पठित- अवबोधनम् - 30

12. अधोलिखित गद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन संतुष्टानाम् अर्थिनां विरल संख्यां विलोक्य अचिन्तयत् - मम अर्थिनः तु धनलाभमात्रेण संतोषंभजन्ते। नूनं ते दानवीराः सौभाग्शालिन: यान्याचकाः शरीरस्य अङ्गानि अपि याचन्ते।एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिम् विज्ञाय सकलं ब्रह्माण्डम् व्याकुलं सञ्जातम् |

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपति: शक्रः( इन्द्र:) नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत् - हे राजन ! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि । देव! रवि -शशि - तारामण्डल – भूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः |

I .एकपदेन उत्तरत - (केवलं प्रश्नद्वयं) **½x 2 = 1**

क ) अर्थिनः केन सन्तुष्टाःअभवन् ?

ख) राज्ञः दानशीलतां परीक्षितुम् कः आगच्छत् ?

ग) शक्रः कस्य रूपं धारयित्वा राज्ञः समीपम् आगच्छत् ?

II. पूर्णवाक्येन उत्तरत | 1 x 2 = 2

क) शक्रः किमर्थम् राज्ञः समीपम् अगच्छत्?

ख) ब्रह्माण्डम् किमर्थम् व्याकुलं सञ्जातम् ?

III. निर्देशानुसारम् उत्तरत - **½x 4 = 2**

क) **'याचन्ते '** इति क्रियापदस्य किम् कर्तृपदम्?

i ) सन्तोषम्  ii) याचकाः  iii) अर्थिनः  iv )मम

ख) ' **सम्पूर्णम्** ' इति पदस्य कःपर्यायः ?

i ) शकलम्  ii ) सकलम्  iii) दीर्घम्  iv ) आपरम्

ग) **'आसक्ते: अभावः '** इत्यर्थे अत्र किम् पदं प्रयुक्तम्?

i ) भक्तिः  ii ) विरक्ति:  iii) अवयवम्  iv) निरासक्तिम्

घ) 'राज्ञ: स्वेषु गात्रेष्वपि निरासक्तिम् विज्ञाय सकलं ब्रह्माण्डम् व्याकुलं सञ्जातम्' अत्र विशेष्य पदं किमस्ति ।

i ) सकलं  ii )ब्रह्माण्डम्  iii ) व्याकुलं  iv ) सञ्जातम्

13 . अधोलिखित श्लोकं पठित्वा प्रश्नानाम् उत्तरत-

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**

**पिताऽस्य किम् तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥**

I. एकपदेन उत्तरत -- (केवलं प्रश्नद्वयं) **½x 2 = 1**

क ) विद्याधनं क: यच्छति ?

ख) पिता कस्मै विद्याधनं यच्छति?

ग) पिता कदा पुत्राय विद्याधनं यच्छति ?

II.पूर्ण वाक्येन उत्तरत - **1 x 2 = 2**

क) पुत्रस्य किम् कृतज्ञता कथ्यते ?

ख) बाल्यकाले पुत्राय पिता किम् करोति ?

III. यथानिर्देशम् उत्तरत- **½x 4 = 2**

क) ' **महत्** ' इतिपदम् कस्य पदस्य विशेषणम् ?

i) पिता  ii ) विद्याधनं  iii ) पुत्राय

ख) '**कृतघ्नता** ' इति पदस्य विलोमपदं चित्वा लिखत |

i ) उपकारम्    ii ) शीलता    iii ) कृतज्ञता

ग) ' **पिताऽस्य किम् तपस्तेपे '** अत्र क्रियापदम् किमस्ति ?

i) तेपे    ii) तप:    iii ) पिता

घ) "**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्" |** अत्र विशेष्यपदम् किमस्ति ?

i ) पुत्राय    ii ) पिता    iii) विद्याधनं

14. अधोलिखितान् नाट्यांशन् पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -

युधिष्ठिर: - गच्छ वत्स ! विजयी भव, नकुल: तव सारथि: भवतु |

( भीमसेन: निर्गच्छति , श्रीकृष्ण: अर्जुनेन सह प्रविशति )

श्रीकृष्ण: - भो धर्मराज:! समीचीनम् न कृतं भवता | पुत्रशोकविह्वल: भीमसेन: एकाकी |

युधिष्ठिर:- भगवन् ! स: तु एकाकी एव द्रोणपुत्राय अलम् |

श्रीकृष्ण: - वत्स ! न जानाति भवान् द्रौणे: चपलाम् प्रकृतिम् | पितु: द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे | यदि तत् प्रयुज्यते , सर्वा पृथ्वी दग्धा स्यात् |

युधिष्ठिर:-- अप्येवम् ! आचार्येण कीदृश: अनर्थ: कृत: | किम् चपलबालकेभ्य: एतादृश - भीषणानाम् अस्त्राणाम् प्रदानं उचितम् ?

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयं)    **½x 2 = 1**

क) द्रौणे: स्वभाव: कीदृश: आसीत् ?

ख) चपलबालकेभ्य: कीदृशानाम् अस्त्राणाम् प्रदानं उचितम् न अस्ति ?

ग) द्रौणे: समीपे किम् नाम अस्त्रं आसीत् ?

**II. पूर्ण वाक्येन उत्तरत -    1 x 2 = 2**

क) यदि ब्रह्मशिर: प्रयुज्यते तर्हि किम् भविष्यति ?

ख) कीदृश: भीमसेन: एकाकी एव द्रौणिम् हन्तुं अभिधावति ?

III. यथानिर्देशम् उत्तरत-    **½x 4 = 2**

क) ' **उचितम्** 'इति अर्थे अत्र किम् पदम् प्रयुक्तं ?

i) उपयुक्तं ii ) समीचीनं iii ) सम्यक्

ख) '**कीदृश: अनर्थ: कृत:** ' अत्र किम् विशेषणपदम् ?

i ) अनर्थ: ii ) कीदृश: iii ) कृत:

ग) ' **दूरे** ' इति पदस्य किम् विलोमपदम् प्रयुक्तं ?

i) निकटे ii) समीपे iii ) पार्श्वे

घ) " **पुत्रशोकविह्वल: भीमसेन: एकाकी एव द्रौणिम् हन्तुं अभिधावति " |** अत्र कर्तृपदम् किमस्ति **?**

i ) पुत्रशोकविह्वल: ii ) भीमसेन: iii) एकाकी

15 . अधोलिखित वाक्येषु स्थूल पदम् आधृत्य प्रश्ननिर्माणं कुरूत - 1 x 5 = 5

क) **साधूनाम्** चित्ते वाचि च सरलता भवति |

ख) **अरुणस्य** प्रदेश: अरुणाचल:|

ग) **अस्मिन संसारे** कश्चिदपि त्वया सदृश: नास्ति |

घ ) **अरुणाचलप्रदेशे** पञ्चाशदधिका नद्य: प्रवहन्ति |

ड़) राजा **याचकेभ्यः** दानं ददाति स्म। |

16. अधोलिखितवाक्येषु रेखांकितपदनाम् प्रसंगानुकूलम् समुचितार्थम् चित्वा लिखत - 1 x 5 =5

क) प्रश्नोत्तर माध्यमेन भवताम् **जिज्ञासाम्** शमयितुम् इच्छामि |

i) गन्तुं इच्छा ii) ज्ञातुम् इच्छा iii) गातुम इच्छा

ख) **विपुला** च अत्र वनसंपदा |

i) पृथ्वी ii) विशाला iii) स्थूला

ग) अहम् खलु काल: **विश्वस्य** आत्मा |

i) जगत: ii) समयस्य iii) देशस्य

घ) अहमेव साक्षी जगत: उत्पत्ते: विकासस्य **प्रलयस्य** च |

i) प्रवर्धनस्य ii) विनाशस्य iii) प्रलापस्य

ड़) मम **कलनस्य** तु आधार: सूर्य: एव |

i) समयस्य ii) कलाया: iii) गणनाया:

17. घटनाक्रमानुसारम् वाक्यानि लिखत - **½ x 10 = 5**

क) स: पापपथं त्यक्त्वा गृहम् आगच्छत् |

ख) पत्न्या: प्रमार्शेन स: परिश्रम कृत्वा शनै: शनै: प्रभूतम् धनं अर्जितवान् |

ग) प्रच्छन्नभाग्य: नामक: एक: कुमार: कर्मपुरनगरे अवसत् |

घ) प्रच्छन्नभाग्यस्य स्वप्नवार्ताम् श्रुत्वा स: झटिति क्षेत्रम् अगच्छन् |

ड़) यदा स: सुवर्णकलशस्य आवरणं अपसारितवान् तदैव तस्मिन् एकं भयंकरम् विषधरम् दृष्टवान् |

च) मार्गे गच्छत: प्रच्छन्नभाग्यस्य मन: केनचित् बालवचसा प्रतिहतं अभवत् |

छ) दुष्टबुद्धि: अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्तवान् |

ज) बाल्ये स: दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि संलग्न: अभवत् |

झ) मित्रस्य धनागमवृत्तान्तम् श्रुत्वा दुष्टबुद्धि: तस्यैव गृहे चौर्यार्थम् अगच्छत् |

ञ) पश्चात्तापेन दग्धमानस: स: सर्वं वृत्तान्तम् भार्यायै निवेद्य सकरुणम् अक्रन्दत् |

*******************************************************************